॥ॐ॥
॥ॐ श्री परमात्मने नमः ॥
॥श्री गणेशाय नमः॥

# श्री कृष्णा स्तवन संग्रह



# विषय-सूची

॥आरती कुंजबिहारी की॥ ........ 3
॥कृष्णाष्टक॥ ........ 7
॥ गोविंद अष्टकम॥ ........ 8
॥ मधुराष्टकम॥ ........ 10
॥ श्री जगन्नाथाष्टकम् ॥ ........ 11
॥ श्रीबालमुकुन्दाष्टकम् ॥ ........ 13
॥ दशावतारस्तोत्रम् ॥ ........ 14
॥ ध्रुवकृतभगवत्स्तुतिः ॥ ........ 16
॥ कृष्णाष्टोत्तरशतनामावलिः ॥ ........ 18
॥ श्रीकृष्णमानसपूजास्तोत्रम् ॥ ........ 22
॥ गोपीगीतम् ॥ ........ 24
॥ इंद्रकृत श्रीकृष्ण स्तोत्रं ॥ ........ 26
॥ श्रीकृष्णाष्टकम् ॥ ........ 28
॥ कृष्णाष्टोत्तरशतनामस्तोत्रम् ॥ ........ 30
॥ बलिकृतं श्रीकृष्णस्तोत्रम् ॥ ........ 34
॥ कृष्णद्वादशनामस्तोत्रम् ॥ ........ 38
॥ भीष्मकृता भगवत्स्तुतिः ॥ ........ 39
॥ गोविन्ददामोदरस्तोत्रम् ॥ ........ 41
॥ कुन्तीदेवीकृत श्रीकृष्णस्तोत्रम् ॥ ........ 48
॥ वसुदेवकृत श्रीकृष्णस्तोत्रम् ॥ ........ 49

## ॥आरती कुंजबिहारी की॥

आरती कुंजबिहारी की, श्री गिरिधर कृष्ण मुरारी की॥
आरती कुंजबिहारी की, श्री गिरिधर कृष्ण मुरारी की॥

गले में बैजंती माला, बजावै मुरली मधुर बाला।
श्रवण में कुण्डल झलकाला, नंद के आनंद नंदलाला।
गगन सम अंग कांति काली, राधिका चमक रही आली।
लतन में ठाढ़े बनमाली
भ्रमर सी अलक, कस्तूरी तिलक, चंद्र सी झलक
ललित छवि श्यामा प्यारी की, श्री गिरिधर कृष्ण मुरारी की॥
आरती कुंजबिहारी की, श्री गिरिधर कृष्ण मुरारी की॥
आरती कुंजबिहारी की, श्री गिरिधर कृष्ण मुरारी की॥

कनकमय मोर मुकुट बिलसै, देवता दरसन को तरसैं।
गगन सों सुमन रासि बरसै।
बजे मुरचंग, मधुर मिरदंग, ग्वालिन संग
अतुल रति गोप कुमारी की, श्री गिरिधर कृष्णमुरारी की॥
आरती कुंजबिहारी की, श्री गिरिधर कृष्ण मुरारी की॥
आरती कुंजबिहारी की, श्री गिरिधर कृष्ण मुरारी की॥

जहां ते प्रकट भई गंगा, कलुष कलि  हारिणि श्री गंगा।

स्मरन ते होत मोह भंगा

बसी शिव सीस, जटा के बीच, हरै अघ कीच,

चरन छवि श्रीबनवारी की, श्री गिरिधर कृष्णमुरारी की॥

आरती कुंजबिहारी की, श्री गिरिधर कृष्ण मुरारी की॥

आरती कुंजबिहारी की, श्री गिरिधर कृष्ण मुरारी की॥

चमकती उज्ज्वल तट रेनू, बज रही वृंदावन बेनू।

चहुं दिसि गोपि ग्वाल धेनू

हंसत मृदु मंद,चांदनी चंद, कटत भव फंद

टेर सुन दीन दुखारी की, श्री गिरिधर कृष्णमुरारी की॥

आरती कुंजबिहारी की, श्री गिरिधर कृष्ण मुरारी की॥

आरती कुंजबिहारी की, श्री गिरिधर कृष्ण मुरारी की॥

**जय जय श्री कृष्ण**

# ॥श्री दामोदराष्टकं॥

नमामीश्वरं सच्-चिद्-आनन्द-रूपं
लसत्-कुण्डलं गोकुले भ्राजमनम्
यशोदा-भियोलूखलाद् धावमानं
परामृष्टम् अत्यन्ततो द्रुत्य गोप्या ॥ १॥

रुदन्तं मुहुर् नेत्र-युग्मं मृजन्तम्
कराम्भोज-युग्मेन सातङ्क-नेत्रम्
मुहुः श्वास-कम्प-त्रिरेखाङ्क-कण्ठ
स्थित-ग्रैवं दामोदरं भक्ति-बद्धम् ॥ २॥

इतीदृक् स्व-लीलाभिर् आनन्द-कुण्डे
स्व-घोषं निमज्जन्तम् आख्यापयन्तम्
तदीयेषित-ज्ञेषु भक्तैर् जितत्वं
पुनः प्रेमतस् तं शतावृत्ति वन्दे ॥ ३॥

वरं देव मोक्षं न मोक्षावधिं वा
न चन्यं वृणे 'हं वरेषाद् अपीह
इदं ते वपुर् नाथ गोपाल-बालं
सदा मे मनस्य् आविरास्तां किम् अन्यैः ॥ ४॥

इदं ते मुखाम्भोजम् अत्यन्त-नीलैर्
वृतं कुन्तलैः स्निग्ध-रक्तैश् च गोप्या
मुहुश् चुम्बितं बिम्ब-रक्ताधरं मे
मनस्य् आविरास्ताम् अलं लक्ष-लाभैः ॥ ५॥

नमो देव दामोदरानन्त विष्णो
प्रसीद प्रभो दुःख-जालाब्धि-मग्नम्
कृपा-दृष्टि-वृष्ट्याति-दीनं बतानु
गृहाणेष माम् अज्ञम् एध्य् अक्षि-दृश्यः ॥ ६॥

कुवेरात्मजौ बद्ध-मूर्त्यैव यद्वत्
त्वया मोचितौ भक्ति-भाजौ कृतौ च
तथा प्रेम-भक्तिं स्वकां मे प्रयच्छ
न मोक्षे ग्रहो मे ’स्ति दामोदरेह ॥ ७॥

नमस् ते’स्तु दाम्ने स्फुरद्-दीप्ति-धाम्ने
त्वदीयोदरायाथ विश्वस्य धाम्ने
नमो राधिकायै त्वदीय-प्रियायै
नमो ’नन्त-लीलाय देवाय तुभ्यम् ॥ ८॥



## ॥कृष्णाष्टक॥

वसुदेव सुतं देवं कंस चाणूर मर्दनम् ।
देवकी परमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥

अतसी पुष्प सङ्काशं हार नूपुर शोभितम् ।
रत्न कङ्कण केयूरं कृष्णं वन्दे जगद्गुरुम् ॥

कुटिलालक संयुक्तं पूर्णचन्द्र निभाननम् ।
विलसत् कुण्डलधरं कृष्णं वन्दे जगद्गुरम् ॥

मन्दार गन्ध संयुक्तं चारुहासं चतुर्भुजम् ।
बर्हि पिंछाव चूडाङ्गं कृष्णं वन्दे जगद्गुरुम् ॥

उत्फुल्ल पद्मपत्राक्षं नील जीमूत सन्निभम् ।
यादवानां शिरोरत्नं कृष्णं वन्दे जगद्गुरुम् ॥

रुक्मिणी केलि संयुक्तं पीताम्बर सुशोभितम् ।
अवाप्त तुलसी गन्धं कृष्णं वन्दे जगद्गुरुम् ॥

गोपिकानां कुचद्वन्द कुङ्कुमाङ्कित वक्षसम् ।
श्रीनिकेतं महेष्वासं कृष्णं वन्दे जगद्गुरुम् ॥

श्रीवत्साङ्कं महोरस्कं वनमाला विराजितम् ।
शङ्खचक्र धरं देवं कृष्णं वन्दे जगद्गुरुम् ॥

कृष्णाष्टक मिदं पुण्यं प्रातरुत्थाय यः पठेत् ।
कोटिजन्म कृतं पापं स्मरणेन विनश्यति ॥

## ॥ गोविंद अष्टकम॥

आदि शङ्कराचार्य कृत

सत्यं ज्ञानमनन्तं नित्यमनाकाशं परमाकाशम् ।
गोष्ठप्राङ्गणरिङ्खणलोलमनायासं परमायासम् ।
मायाकल्पितनानाकारमनाकारं भुवनाकारम् ।
क्ष्मामानाथमनाथं प्रणमत गोविन्दं परमानन्दम् ॥ 1 ॥

मृत्स्नामत्सीहेति यशोदाताडनशैशव सन्त्रासम् ।
व्यादितवक्त्रालोकितलोकालोकचतु र्दशलोकालिम् ।
लोकत्रयपुरमूलस्तम्भं लोकालोकमनालोकम् ।
लोकेशं परमेशं प्रणमत गोविन्दं परमानन्दम् ॥ 2 ॥

त्रैविष्टपरिपुवीरघ्नं क्षितिभारघ्नं भवरोगघ्नम् ।
कैवल्यं नवनीताहारमनाहारं भुवनाहारम् ।
वैमल्यस्फुटचेतोवृत्तिविशेषाभा समनाभासम् ।
शैवं केवलशान्तं प्रणमत गोविन्दं परमानन्दम् ॥ 3 ॥

गोपालं प्रभुलीलाविग्रहगोपालं कुलगोपालम् ।
गोपीखेलनगोवर्धनधृतिलीलालालितगो पालम् ।
गोभिर्निगदित गोविन्दस्फुटनामानं बहुनामानम् ।
गोपीगोचरदूरं प्रणमत गोविन्दं परमानन्दम् ॥ 4 ॥

गोपीमण्डलगोष्ठीभेदं भेदावस्थमभेदाभम् ।
शश्वद्गोखुरनिर्धूतोद्गत धूलीधूसरसौभाग्यम् ।
श्रद्धाभक्तिगृहीतानन्दमचिन्त् यं चिन्तितसद्भावम् ।
चिन्तामणिमहिमानं प्रणमत गोविन्दं परमानन्दम् ॥ 5 ॥

स्नानव्याकुलयोषिद्वस्त्रमुपादा यागमुपारूढम् ।
व्यादित्सन्तीरथ दिग्वस्त्रा दातुमुपाकर्षन्तं ताः
निर्धूतद्वयशोकविमोहं बुद्धं बुद्धेरन्तस्थम् ।
सत्तामात्रशरीरं प्रणमत गोविन्दं परमानन्दम् ॥ 6 ॥

कान्तं कारणकारणमादिमनादिं कालधनाभासम् ।
कालिन्दीगतकालियशिरसि सुनृत्यन्तम् मुहुरत्यन्तम् ।
कालं कालकलातीतं कलिताशेषं कलिदोषघ्नम् ।
कालत्रयगतिहेतुं प्रणमत गोविन्दं परमानन्दम् ॥ 7 ॥

बृन्दावनभुवि बृन्दारकगणबृन्दाराधितवन्देहम् ।
कुन्दाभामलमन्दस्मेरसुधानन्दं सुहृदानन्दम् ।
वन्द्याशेष महामुनि मानस वन्द्यानन्दपदद्वन्द्वम् ।
वन्द्याशेषगुणाब्धिं प्रणमत गोविन्दं परमानन्दम् ॥ 8 ॥

गोविन्दाष्टकमेतदधीते गोविन्दार्पितचेता यः ।
गोविन्दाच्युत माधव विष्णो गोकुलनायक कृष्णेति ।
गोविन्दाङ्घ्रि सरोजध्यानसुधाजलधौतसमस्ताघः ।
गोविन्दं परमानन्दामृतमन्तस्थं स तमभ्येति ॥

**॥ इति श्री शङ्कराचार्य विरचित श्रीगोविन्दाष्टकं समाप्तं ॥**



## ॥ मधुराष्टकम ॥

अधरं मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरम् ।
हृदयं मधुरं गमनं मधुरं मधुराधिपतेरखिलं मधुरम् ॥१॥

वचनं मधुरं चरितं मधुरं वसनं मधुरं वलितं मधुरम् ।
चलितं मधुरं भ्रमितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥२॥

वेणुर्मधुरो रेणुर्मधुरः पाणिर्मधुरः पादौ मधुरौ ।
नृत्यं मधुरं सख्यं मधुरं मधुराधिपतेरखिलं मधुरम् ॥३॥

गीतं मधुरं पीतं मधुरं भुक्तं मधुरं सुप्तं मधुरम् ।
रूपं मधुरं तिलकं मधुरं मधुराधिपतेरखिलं मधुरम् ॥४॥

करणं मधुरं तरणं मधुरं हरणं मधुरं रमणं मधुरम् ।
वमितं मधुरं शमितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥५॥

गुञ्जा मधुरा माला मधुरा यमुना मधुरा वीची मधुरा ।
सलिलं मधुरं कमलं मधुरं मधुराधिपतेरखिलं मधुरम् ॥६॥

गोपी मधुरा लीला मधुरा युक्तं मधुरं मुक्तं मधुरम् ।
दृष्टं मधुरं शिष्टं मधुरं मधुराधिपतेरखिलं मधुरम् ॥७॥

गोपा मधुरा गावो मधुरा यष्टिर्मधुरा सृष्टिर्मधुरा ।
दलितं मधुरं फलितं मधुरं मधुराधिपतेरखिलं मधुरम् ॥८॥

## ॥ श्री जगन्नाथाष्टकम् ॥

कदाचित् कालिन्दी तट विपिन सङ्गीत तरलो
मुदाभीरी नारी वदन कमला स्वाद मधुपः
रमा शम्भु ब्रह्मामरपति गणेशार्चित पदो
जगन्नाथः स्वामी नयन पथ गामी भवतु मे ॥१॥

भुजे सव्ये वेणुं शिरसि शिखिपिच्छं कटितटे
दुकूलं नेत्रान्ते सहचर-कटाक्षं विदधते ।
सदा श्रीमद्-वृन्दावन-वसति-लीला-परिचयो
जगन्नाथः स्वामी नयन-पथ-गामी भवतु मे ॥२॥

महाम्भोधेस्तीरे कनक रुचिरे नील शिखरे
वसन् प्रासादान्तः सहज बलभद्रेण बलिना ।
सुभद्रा मध्यस्थः सकलसुर सेवावसरदो
जगन्नाथः स्वामी नयन-पथ-गामी भवतु मे ॥३॥

कृपा पारावारः सजल जलद श्रेणिरुचिरो
रमा वाणी रामः स्फुरद् अमल पङ्केरुहमुखः ।
सुरेन्द्रैर् आराध्यः श्रुतिगण शिखा गीत चरितो
जगन्नाथः स्वामी नयन पथ गामी भवतु मे ॥४॥

रथारूढो गच्छन् पथि मिलित भूदेव पटलैः
स्तुति प्रादुर्भावम् प्रतिपदमुपाकर्ण्य सदयः ।
दया सिन्धुर्बन्धुः सकल जगतां सिन्धु सुतया
जगन्नाथः स्वामी नयन पथ गामी भवतु मे ॥५॥

परंब्रह्मापीड़ः कुवलय-दलोत्फुल्ल-नयनो
निवासी नीलाद्रौ निहित-चरणोऽनन्त-शिरसि ।
रसानन्दी राधा-सरस-वपुरालिङ्गन-सुखो
जगन्नाथः स्वामी नयन-पथगामी भवतु मे ॥६॥

न वै याचे राज्यं न च कनक माणिक्य विभवं
न याचेऽहं रम्यां सकल जन काम्यां वरवधूम् ।
सदा काले काले प्रमथ पतिना गीतचरितो
जगन्नाथः स्वामी नयन पथ गामी भवतु मे ॥७॥

हर त्वं संसारं द्रुततरम् असारं सुरपते
हर त्वं पापानां विततिम् अपरां यादवपते ।
अहो दीनेऽनाथे निहित चरणो निश्चितमिदं
जगन्नाथः स्वामी नयन पथ गामी भवतु मे ॥८॥

जगन्नाथाष्टकं पुन्यं यः पठेत् प्रयतः शुचिः ।
सर्वपाप विशुद्धात्मा विष्णुलोकं स गच्छति ॥९॥

**॥ इति श्रीमत् शंकराचार्यविरचितं जगन्नाथाष्टकं संपूर्णम् ॥**

## ॥ श्रीबालमुकुन्दाष्टकम् ॥

करारविन्देन पदारविन्दं मुखारविन्दे विनिवेशयन्तम् ।
वटस्य पत्रस्य पुटे शयानं बालं मुकुन्दं मनसा स्मारामि ॥१॥

संहृत्य लोकान् वटपत्रमध्ये शयानमाद्यन्तविहीनरूपम् ।
सर्वेश्वरं सर्वहितावतारं बालं मुकुन्दं मनसा स्मारामि ॥२॥

इन्दीवरश्यामलकोमलाङ्गं इन्द्रादिदेवार्चितपादपद्मम् ।
सन्तानकल्पद्रुममाश्रितानां बालं मुकुन्दं मनसा स्मारामि ॥३॥

लंबालकं लंवितहारयष्टिं शृङ्गारलीलाङ्कितदन्तपङ्क्तिम् ।
बिंबाधरं चारुविशालनेत्रं बालं मुकुन्दं मनसा स्मारामि ॥४॥

शिक्ये निधायाद्य पयोदधीनि बहिर्गतायां व्रजनायिकायाम् ।
भुक्त्वा यथेष्टं कपटेन सुप्तं बालं मुकुन्दं मनसा स्मारामि ॥५॥

कलिन्दजान्तस्थितकालियस्य फणाग्ररङ्गे नटनप्रियन्तम् ।
तत्पुच्छहस्तं शरदिन्दुवक्त्रं बालं मुकुन्दं मनसा स्मारामि ॥६॥

उलुखले बद्धमुदारशौर्यं उत्तुङ्गयुग्मार्जुनमङ्गलीलम् ।
उत्फुल्लपद्मायतचारुनेत्रं बालं मुकुन्दं मनसा स्मारामि ॥७॥

आलोक्य मातुर्मुखमादेण स्तन्यं पिबन्तं सरसीरुहाक्षम् ।
सच्चिन्मयं देवमनन्तरूपं बालं मुकुन्दं मनसा स्मारामि ॥८॥

## ॥ दशावतारस्तोत्रम् ॥

(जयदेवकृतं, अष्टपदी अन्तर्गतम्)

प्रलयपयोधिजले  धृतवानसि वेदम् विहितवहित्रचरित्रमखेदम् ।
केशव धृतमीनशरीर जय जगदीश हरे ॥ १ ॥

क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे धरणिधरणकिणचक्रगरिष्ठे ।
केशव धृतकच्छपरूप जय जगदीश हरे ॥ २ ॥

वसति दशनशिखरे धरणी तव लग्ना शशिनि कलङ्ककलेव निमग्ना ।
केशव धृतसूकररूप जय जगदीश हरे ॥ ३ ॥

तव करकमलवरे नखमद्भुतशृङ्गम् दलितहिरण्यकशिपुतनुभृङ्गम् ।
केशव धृतनरहरिरूप जय जगदीश हरे ॥ ४ ॥

छलयसि विक्रमणे बलिमद्भुतवामन पदनखनीरजनित जनपावन ।
केशव धृतवामनरूप जय जगदीश हरे ॥ ५ ॥

क्षत्रियरुधिरमये जगदपगतपापम् स्नपयसिपयसि शमितभवतापम् ।
केशव धृतभृगुपतिरूप जय जगदीश हरे ॥ ६ ॥

वितरसि दिक्षु रणे दिक्पतिकमनीयम् दशमुखमौलिबलिं रमणीयम् ।
केशव धृतरघुपतिवेष जय जगदीश हरे ॥ ७ ॥

वहसि वपुषि विशदे वस नं जलदाभम् हलहतिभीतिमिलितयमुनाभम् ।
केशव धृतहलधररूप जय जगदीश हरे ॥ ८ ॥

निन्दसि यज्ञविधेरहह श्रुतिजातम् सदयहृदय दर्शितपशुघातम् ।
केशव धृतबुद्धशरीर जय जगदीश हरे ॥ ९ ॥

म्लेच्छनिवहनिधने कलयसि करवालम् धूमकेतुमिव किमपि करालम् ।

केशव धृतकल्किशरीर जय जगदीश हरे ॥ १० ॥

श्रीजयदेवकवेरिदमुदितमुदारम् शृणु सुखदं शुभदं भवसारम् ।
केशव धृतदशविधरूप जय जगदीश हरे ॥ ११ ॥

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते ।
पौलस्त्यं जयते हलं कुलयते कारुण्यमातन्वते म्लेच्छान् मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥ १२ ॥



## ॥ ध्रुवकृतभगवत्स्तुतिः ॥

योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्ताम्
सञ्जीवयत्यखिलशक्तिधरः स्वधाम्ना ।
अन्यांश्च हस्तचरणश्रवणत्वगादीन्
प्राणान्नमो भगवते पुरुषाय तुभ्यम् ॥ १ ॥

एकस्त्वमेव भगवन्निदमात्मशक्त्या
मायाख्ययोरुगुणया महदाद्यशेषम् ।
सृष्ट्वानुविश्य पुरुषस्तदसद्गुणेषु
नानेव दारुषु विभावसुवद्विभासि ॥ २ ॥

त्वद्दत्तया वयुनयेदमचष्ट विश्वम्
सुप्तप्रबुद्ध इव नाथ भवत्प्रपन्नः ।
तस्यापवर्ग्यशरणं तव पादमूलम्
विस्मर्यते कृतविदा कथमार्तबन्धो ॥ ३ ॥

नूनं विमुष्टमतयस्तव मायया ते
ये त्वां भवाप्ययविमोक्षणमन्यहेतोः ।
अर्चन्ति कल्पकतरुं कुणपोपभोग्य-
मिच्छन्ति यत्स्पर्शजं निरयेऽपि नृणाम् ॥ ४ ॥

या निर्वृतिस्तनुभृतां तव पादपद्म-
ध्यानात् भवज्जनकथाश्रवणेन वा स्यात् ।
सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्
किं त्वन्तकासि लुलितात् पततां विमानात् ॥ ५ ॥

भक्तिं मुहुः प्रवहतां त्वयि मे प्रसङ्गो
भूयादनन्त महताममलाशयानाम् ।
येनाञ्जसोल्बणमुरुव्यसनं भवाब्धिम्
नेष्ये भवद्गुणकथामृतपानमत्तः ॥ ६ ॥

तॆ न स्मरन्त्यतितरां प्रियमीश मर्त्यम्
यॆ चान्वदः सुतसुहृद्गृहवित्तदाराः ।
ते त्वब्जनाभ भवदीय पदारविन्द-
सौगन्ध्यलुब्धहृदयॆषु कृतप्रसङ्गाः ॥ ७ ॥

तिर्यङ्नगद्विजसरीसृपदॆवदैत्य-
मर्त्यादिभिः परिचितं सदसद्विशॆषम् ।
रूपं स्थविष्ठमज तॆ महदाद्यनॆकम्
नातः परं परम वॆद्मि न यत्र वादः ॥ ८ ॥

कल्पान्त एतदखिलं जठरॆण गृह्णन्
शॆतॆ पुमान् स्वदृगनन्तसखस्तदङ्कॆ ।
यन्नाभिसिन्धुरुहकाञ्चनलोकपद्म-
गर्भॆ द्युमान् भगवतॆ प्रणतोऽस्मि तस्मै ॥ ९ ॥

त्वं नित्यमुक्तपरिशुद्धविबुद्ध आत्मा
कूटस्थ आदिपुरुषो भगवांस्त्र्यधीशः ।
यद्बुध्यवस्थितिमखण्डितया स्वदृष्ट्या
द्रष्टा स्थितावधिमखॊ व्यतिरिक्त आस्सॆ ॥ १० ॥

यस्मिन् विरुद्धगतयॊ ह्यनिशं पतन्ति
विद्यादयॊ विविध शक्तयः आनुपूर्व्यात् ।
तत् ब्रह्म विश्वभवमॆकमनन्तमाद्यम्
आन्दमात्रमविकारमहं प्रपद्यॆ ॥ ११ ॥

सत्याशिषो हि भगवंस्तव पादप्द्म-
माशीस्तथानुभजतः पुरुषार्थमूर्तॆः ।
अप्यॆवमर्य भगवान् परिपाति दीनान्
वाश्रॆव वत्सकमनुग्रहकातरॊऽस्मान् ॥ १२ ॥

## ॥ कृष्णाष्टोत्तरशतनामावलिः ॥

ॐ श्रीकृष्णय नमः

ॐ कमलानाथाय नमः

ॐ वासुदेवाय नमः

ॐ सनातनाय नमः

ॐ वसुदेवात्मजाय नमः

ॐ पुण्याय नमः

ॐ लीलामानुषविग्रहाय नमः

ॐ श्रीवत्सकौस्तुभधराय नमः

ॐ यशोदावत्सलाय नमः

ॐ हरये नमः

ॐ चतुर्भुजात्तचक्रासिगदाशङ्खाम्बुजायुधाय नमः

ॐ देवकीनन्दनाय नमः

ॐ श्रीशाय नमः

ॐ नन्दगोपप्रियात्मजाय नमः

ॐ यमुनावेगसंहारिणे नमः

ॐ बलभद्रप्रियानुजाय नमः

ॐ पूतनाजीवितहराय नमः

ॐ शकटासुरभञ्जनाय नमः

ॐ नन्दव्रजजनानन्दिने नमः

ॐ सच्चिदानन्दविग्रहाय नमः

ॐ नवनीतविलिप्ताङ्गाय नमः

ॐ नवनीतनटाय नमः

ॐ अनघाय नमः

ॐ नवनीतनवाहाराय नमः

ॐ मुचुकुन्दप्रसादकाय नमः

ॐ षोडशस्त्रीसहस्रेशाय नमः

ॐ त्रिभङ्गीमधुराकृतये नमः

ॐ शुकवागमृताब्धीन्दवे नमः

ॐ गोविन्दाय नमः

ॐ योगिनां पतये नमः

ॐ वत्सवाटचराय नमः

ॐ अनन्ताय नमः

ॐ धेनुकासुरमर्दनाय नमः

ॐ तृणीकृततृणावर्ताय नमः

ॐ यमलार्जुनभञ्जनाय नमः

ॐ उत्तालतालभेत्रे नमः

ॐ तमालश्यामलाकृतये नमः

ॐ गोपगोपीश्वराय नमः

ॐ योगिने नमः

ॐ कोटिसूर्यसमप्रभाय नमः

ॐ इलापतये नमः

ॐ परस्मै ज्योतिषे नमः

ॐ यादवेन्द्राय नमः

ॐ यदूद्वहाय नमः

ॐ वनमालिने नमः

ॐ पीतवाससे नमः

ॐ पारिजातापहारकाय नमः

ॐ गोवर्धनाचलोद्धर्त्रे नमः

ॐ गोपालाय नमः

ॐ सर्वपालकाय नमः

ॐ अजाय नमः

ॐ निरञ्जनाय नमः

ॐ कामजनकाय नमः

ॐ कञ्जलोचनाय नमः

ॐ मधुघ्ने नमः

ॐ मथुरानाथाय नमः

ॐ द्वारकानायकाय नमः

ॐ बलिने नमः

ॐ बृन्दावनान्तसञ्चारिने नमः

ॐ तुलसीदामभूषणाय नमः

ॐ स्यमन्तकमणेर्हर्त्रे नमः

ॐ नरनारायणात्मकाय नमः

ॐ कुब्जाकृष्णाम्बरधराय नमः

ॐ मायिने नमः

ॐ परमपूरुषाय नमः

ॐ मुष्टिकासुरचाणूरमल्लयुद्धविशारदाय नमः

ॐ संसारवैरिणे नमः

ॐ कंसारये नमः

ॐ मुरारये नमः

ॐ नरकान्तकाय नमः

ॐ अनादिब्रह्मचारिणे नमः

ॐ कृष्णाव्यसनकर्षकाय नमः

ॐ शिशुपालशिरश्छेत्रे नमः

ॐ दुर्योधनकुलान्तकाय नमः

ॐ विदुराक्रूरवरदाय नमः

ॐ विश्वरूपप्रदर्शकाय नमः

ॐ सत्यवाचे नमः

ॐ सत्यसङ्कल्पाय नमः

ॐ सत्यभामारताय नमः

ॐ जयिने नमः

ॐ सुभद्रापूर्वजाय नमः

ॐ विष्णवे नमः

ॐ भीष्ममुक्तिप्रदायकाय नमः

ॐ जगद्गुरवे नमः

ॐ जगन्नाथाय नमः

ॐ वेणुनादविशारदाय नमः

ॐ वृषभासुरविध्वंसिने नमः

ॐ बाणासुरकरान्तकाय नमः

ॐ युधिष्ठिरप्रतिष्ठात्रे नमः

ॐ बर्हिबर्हावतंसकाय नमः

ॐ पार्थसारथये नमः

ॐ अव्यक्ताय नमः

ॐ गीतामृतमहोदधये नमः

ॐ कालीयफणिमाणिक्यरञ्जितश्रीपदाम्बुजाय नमः

ॐ दामोदराय नमः

ॐ यज्ञभोक्त्रे नमः

ॐ दानवेन्द्रविनाशकाय नमः

ॐ नारायणाय नमः

ॐ परब्रह्मणे नमः

ॐ पन्नगाशनवाहनाय नमः

ॐ जलक्रीडासमासक्तगोपीवस्त्रापहारकाय नमः

ॐ पुण्यश्लोकाय नमः

ॐ तीर्थपादाय नमः

ॐ वेदवेद्याय नमः

ॐ दयानिधये नमः

ॐ सर्वतीर्थात्मकाय नमः

ॐ सर्वग्रहरूपिणे नमः

ॐ परात्पराय नमः

**॥ इति श्री ब्रह्माण्डमहापुराणे वायुप्रोक्ते श्री कृष्णाष्टोत्तरशतनामावलिः सम्पूर्ण॥**

## ॥ श्रीकृष्णमानसपूजास्तोत्रम् ॥

(श्रीशंकराचार्यविरचितम्)

हृदंभोजे कृष्णस्सजलजलदश्यामलतनुः
सरोजाक्षः स्रग्वी मकुटकटकाद्याभरणवान् ।
शरद्राकानाथप्रतिमवदनः श्रीमुरलिकां
वहन् ध्येयो गोपीगणपरिवृतः कुङ्कुमचितः ॥ १ ॥

पयांभोधेर्द्वीपात् ममहृदयमायाहि भगवन्
मणिव्रातभ्राजत् कनकवरपीठं भजहरे ।
सुचिह्नौ ते पादौ यदुकुलज नेनेज्मि सुजलैः
गृहाणेदं दूर्वादलजलवदर्घ्यं मुररिपो ॥ २ ॥

त्वमाचामोपेन्द्र त्रिदशसरिदंभोऽतिशिशिरं
भजस्वेमं पञ्चामृतरचितमाप्लावमघहन् ।
द्युनद्याः कालिन्द्या अपि कनककुंभस्थमिदं
जलं तेन स्नानं कुरु कुरु कुरुष्वाचमनकम् ॥ ३ ॥

तटिद्वर्णे वस्त्रे भज विजयकान्ताधिहरण
प्रलम्बारिभ्रातः मृदुलमुपवीतं कुरु गले ।
ललाटे पाटीरं मृगमदयुतं धारय हरे
गृहाणेदं माल्यं शतदलतुलस्यादिरचितम् ॥ ४ ॥

दशाङ्गं धूपं सद्वरद चरणाग्रेऽर्पितमिदं
मुखं दीपेनेन्दुप्रभ विरजसं देव कलये ।
इमौ पाणी वाणीपतिनुत सुकर्पूररजसा
विशोध्याग्रे दत्तं सलिलमिदमाचाम नृहरे ॥ ५ ॥

सदा तृप्तान्नं षड्रसवदखिलव्यंजनयुतं
सुवर्णामत्रे गोघृतचषकयुक्ते स्थितमिदम् ।
यशोदासूनो तत् परमदययाऽशान सखिभिः
प्रसादं वाञ्छद्भिः सह तदनु नीरं पिब विभो ॥ ६ ॥

सचूर्णं ताम्बूलं मुखशुचिकरं भक्षय हरे
फलं स्वादु प्रीत्या परिमलवदास्वादय चिरम् ।
सपर्यापर्याप्त्यै कनकमणिजातं स्थितमिदं
प्रदीपैरारार्तिं जलधितनयाश्लिष्ट रचये ॥ ७ ॥
विजातीयैः पुष्पैरतिसुरभिभिर्बिल्वतुलसी-
युतैश्चेमं पुष्पाञ्जलिमजित ते मूर्ध्नि निदधे ।
तव प्रादक्षिण्यक्रमणमघविद्ध्वंसि रचितं
चतुर्वारं विष्णो जनिपथगतिश्रान्तिद विभो ॥ ८ ॥

नमस्कारोऽष्टाङ्गस्सकलदुरितध्वं सनपटुः
कृतं नृत्यं गीतं स्तुतिरपि रमाकान्त सततं ।
तव प्रीत्यै भूयादहमपि च दासस्तव विभो
कृतं छिद्रं पूर्णं कुरु कुरु नमस्तेऽस्तु भगवन् ॥ ९ ॥

सदा सेव्यः कृष्णस्सजलघननीलः करतले
दधानो दध्यन्नं तदनु नवनीतं मुरलिकाम् ।
कदाचित् कान्तानां कुचकलशपत्रालिरचना-
समासक्तः स्निग्धैस्सह शिशुविहारं विरचयन् ॥ १० ॥

मणिकर्णीच्छया जातमिदं मानसपूजनम् ।
यः कुर्वीतोषसि प्राज्ञः तस्य कृष्णः प्रसीदति ॥ ११ ॥

# ॥ गोपीगीतम् ॥

गोप्य ऊचुः

जयति तेऽधिकं जन्मना व्रजः श्रयत इन्दिरा शश्वदत्र हि ।
दयित दृश्यतां दिक्षु तावकास्त्वयि धृतासवस्त्वां विचिन्वते ॥ १॥

शरदुदाशये साधुजातसत्सरसिजोदरश्रीमुषा दृशा ।
सुरतनाथ तेऽशुल्कदासिका वरद निघ्नतो नेह किं वधः ॥ २॥

विषजलाप्ययाद्व्यालराक्षसाद्वर्षमारुताद्वैद्युतानलात् ।
वृषमयात्मजाद्विश्वतोभया दृषभ ते वयं रक्षिता मुहुः ॥ ३॥

न खलु गोपिकानन्दनो भवानखिलदेहिनामन्तरात्मदृक् ।
विखनसार्थितो विश्वगुप्तये सख उदेयिवान्सात्वतां कुले ॥ ४॥

विरचिताभयं वृष्णिधुर्य ते चरणमीयुषां संसृतेर्भयात् ।
करसरोरुहं कान्त कामदं शिरसि धेहि नः श्रीकरग्रहम् ॥ ५॥

व्रजजनार्तिहन्वीर योषितां निजजनस्मयध्वंसनस्मित ।
भज सखे भवत्किङ्करीः स्म नो जलरुहाननं चारु दर्शय ॥ ६॥

प्रणतदेहिनां पापकर्शनं तृणचरानुगं श्रीनिकेतनम् ।
फणिफणार्पितं ते पदांबुजं कृणु कुचेषु नः कृन्धि हृच्छयम् ॥ ७॥

मधुरया गिरा वल्गुवाक्यया बुधमनोज्ञया पुष्करेक्षण ।
विधिकरीरिमा वीर मुह्यती रधरसीधुनाऽऽप्याययस्व नः ॥ ८॥

तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहम् ।
श्रवणमङ्गलं श्रीमदाततं भुवि गृणन्ति ते भूरिदा जनाः ॥ ९॥

प्रहसितं प्रिय प्रेमवीक्षणं विहरणं च ते ध्यानमङ्गलम् ।
रहसि संविदो या हृदिस्पृशः कुहक नो मनः क्षोभयन्ति हि ॥ १०॥

चलसि यद्व्रजाच्चारयन्पशून् नलिनसुन्दरं नाथ ते पदम् ।
शिलतृणाङ्कुरैः सीदतीति नः कलिलतां मनः कान्त गच्छति ॥ ११॥

दिनपरिक्षये नीलकुन्तलैर्वनरुहाननं बिभ्रदावृतम् ।
घनरजस्वलं दर्शयन्मुहुर्मनसि नः स्मरं वीर यच्छसि ॥ १२॥

प्रणतकामदं पद्मजार्चितं धरणिमण्डनं ध्येयमापदि ।
चरणपङ्कजं शन्तमं च ते रमण नः स्तनेष्वर्पयाधिहन् ॥ १३॥

सुरतवर्धनं शोकनाशनं स्वरितवेणुना सुष्ठु चुम्बितम् ।
इतररागविस्मारणं नृणां वितर वीर नस्तेऽधरामृतम् ॥ १४॥

अटति यद्भवानह्नि काननं त्रुटिर्युगायते त्वामपश्यताम् ।
कुटिलकुन्तलं श्रीमुखं च ते जड उदीक्षतां पक्ष्मकृद्दृशाम् ॥ १५॥

पतिसुतान्वयभ्रातृबान्धवानतिविलङ्घ्य तेऽन्त्यच्युतागताः ।
गतिविदस्तवोद्गीतमोहिताः कितव योषितः कस्त्यजेन्निशि ॥ १६॥

रहसि संविदं हृच्छयोदयं प्रहसिताननं प्रेमवीक्षणम् ।
बृहदुरः श्रियो वीक्ष्य धाम ते मुहुरतिस्पृहा मुह्यते मनः ॥ १७॥

व्रजवनौकसां व्यक्तिरङ्ग ते वृजिनहन्त्र्यलं विश्वमङ्गलम् ।
त्यज मनाक् च नस्त्वत्स्पृहात्मनां स्वजनहृद्रुजां यन्निषूदनम् ॥ १८॥

यत्ते सुजातचरणाम्बुरुहं स्तनेष भीताः शनैः प्रिय दधीमहि कर्कशेषु ।
तेनाटवीमटसि तद्व्यथते न किंस्वित् कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः ॥ १९॥

**॥ इति श्रीमद्भागवत महापुराणे पारमहंस्यां संहितायां दशमस्कन्धे पूर्वार्धे रासक्रीडायां गोपीगीतं ॥**

## ॥ इंद्रकृत श्रीकृष्ण स्तोत्रं ॥

अक्षरं परमं ब्रह्म ज्योतीरुपं सनातनम् ।
गुणातीतं निराकारं स्वेच्छामयमनन्तकम् ॥ १ ॥

भक्तध्यानाय सेवायै नानारुपधरं वरम् ।
शुक्लरक्तपीतश्यामं युगानुक्रमणेन च ॥ २ ॥

शुक्लतेजःस्वरुपं च सत्ये सत्यस्वरुपिणम् ।
त्रेतायां कुङ्कुमाकारं ज्वलन्तं ब्रह्मतेजसा ॥ ३ ॥

द्वापारे पीतवर्णं च शोभितं पीतवाससा ।
कृष्णवर्णं कलौ कृष्णं परिपूर्णतमं प्रभूम् ॥ ४ ॥

नवधाराधरोत्कृष्टश्यामसुन्दरविग्रहम् ।
नन्दैकनन्दनं वन्दे यशोदानन्दनं प्रभुम् ॥ ५ ॥

गोपिकाचेतनहरं राधाप्राणाधिकं परम् ।
विनोदमुरलीशब्दं कुर्वन्तं कौतुकेन च ॥ ६ ॥

रुपेणाप्रतिमेनैव रत्नभूषणभूषितम् ।
कन्दर्पकोटिसौनदर्यं बिभ्रन्तं शान्तमीश्वरम् ॥ ७ ॥

क्रीडन्तं राधया सार्धं वृन्दारण्ये च कुत्रचित् ।
कुत्रचिन्निर्जनेऽरण्ये राधावक्षःस्थलस्थितम् ॥ ८ ॥

जलक्रीडां प्रकुर्वन्तं राधया सह कुत्रचित् ।
राधिकाकबरीभारं कुर्वन्तं कुत्रचिद् वने ॥ ९ ॥

कुत्रचिद्राधिकापादे दत्तवन्तमलक्तकम् ।
राधाचर्विततताम्बूलं गृह्णन्तं कुत्रचिन्मुदा ॥ १० ॥

पश्यन्तं कुत्रचिद्राधां पश्यन्तीं वक्रचक्षुषा ।

दत्तवन्तं च राधायै कृत्वा मालां च कुत्रचित् ॥ ११ ॥

कुत्रचिद्राधया सार्धं गच्छन्तं रासमण्डलम् ।
राधादत्तां गले मालां धृतवन्तं च कुत्रचित् ॥ १२ ॥

सार्धं गोपालिकाभिश्च विहरन्तं च कुत्रचित् ।
राधां गृहीत्वा गच्छन्तं विहायतां च कुत्रचित् ॥ १३ ॥

विप्रपत्नीदत्तमन्नं भुक्तवन्तं च कुत्रचित् ।
भुक्तवन्तं तालफलं बालकैः सह कुत्रचित् ॥ १४ ॥

कालीयमूर्न्धिपादाब्जं दत्तवन्तं च कुत्रचित् ।
विनोदमुरलीशब्दं कुर्वन्तं कुत्रचिन्मुदा ॥ १५ ॥

गायन्तं रम्यसंगीतं कुत्रचिद् बालकैः सह ।
स्तुत्वा शक्रः स्तवेन्द्रेण प्रणनाम हरिं भिया ॥ १६ ॥

पुरा दत्तेन गुरुणा रणे वृत्रासुरेण च ।
कृष्णेन दत्तं कृपया ब्रह्मणे च तपस्यते ॥ १७ ॥

एकादशाक्षरो मन्त्रः कवचं सर्वलक्षणम् ।
दत्तमेतत् कुमाराय पुष्करे ब्रह्मणा पुरा ॥ १८ ॥

कुमारोऽङगिरसे दत्तो गुरवेऽङगिरसा मुने ।
इदमिन्द्रकृतं स्तोत्रं नित्यं भक्त्या च यः पठेत् ॥ १९ ॥

इह प्राप्य दृढां भक्तिमन्ते दास्यं लभेद् ध्रुवम् ।
जन्ममृत्युजराव्याधिशोकेभ्यो मुच्यते नरः ॥ २० ॥

न हि पश्यति स्वप्नेऽपि यमदूतं यमालयम् ॥ २१ ॥

**॥ इति श्रीब्रह्मवैर्तपुराणे श्रीकृष्णजन्मखण्डे इंद्रकृत श्रीकृष्ण स्तोत्रं संपूर्णं ॥**

## ॥ श्रीकृष्णाष्टकम् ॥

(श्री शंकराचार्यकृतम्)

भजे व्रजैकमण्डनं समस्तपापखण्डनं
स्वभक्तचित्तरञ्जनं सदैव नन्दनन्दनम् ।
सुपिच्छगुच्छमस्तकं सुनादवेणुहस्तकं
अनंगरंगसागरं नमामि कृष्णनागरम् ॥ १ ॥

मनोजगर्वमोचनं विशाललोललोचनं
विधूतगोपशोचनं नमामि पद्मलोचनम् ।
करारविन्दभूधरं स्मितावलोकसुन्दरं
महेन्द्रमानदारणं नमामि कृष्णवारणम् ॥ २ ॥

कदम्बसूनकुण्डलं सुचारुगण्डमण्डलं
व्रजाङ्गनैकवल्लभं नमामि कृष्ण दुर्लभम् ।
यशोदया समोदया सगोपया सनन्दया
युतं सुखैकदायकं नमामि गोपनायकम् ॥ ३ ॥

सदैव पादपङ्कजं मदीयमानसे निजं
दधानमुत्तमालकं नमामि नन्दबालकम्
समस्तदोषशोषणं समस्तलोकपोषणं
समस्तगोपमानसं नमामि नन्दलालसम् ॥ ४ ॥

भुवोभरावतारकं भवाब्धिकर्णधारकं
यशोमतीकिशोरकं नमामि चित्तचोरकम् ।
दृगन्तकान्तभङ्गिनं सदासदालसङ्गिनं
दिने दिने नवं नवं नमामि नन्दसंभवम् ॥ ५ ॥

गुणाकरं सुखाकरं कृपाकरं कृपापरं
सुरद्विषन्निकन्दनं नमामि गोपनन्दनम् ।
नवीनगोपनागरं नवीनकेलिलंपटं
नमामि मेघसुन्दरं तटित्प्रभालसत्पटम् ॥ ६ ॥

समस्तगोपनन्दनं हृदंबुजैकमोदनं
नमामि कुञ्जमध्यगं प्रसन्नभानुशोभनम् ।
निकामकामदायकं दृगन्तचारुसायकं
रसालवेणुगायकं नमामि कुञ्जनायकम् ॥ ७ ॥

विदग्धगोपिकामनोमनोज्ञतल्पशायि नं
नमामि कुञ्जकानने प्रवृद्धवह्निपायिनम् ।
यदा तदा यथा तथा तथैव कृष्णसत्कथा
मया सदैव गीयतां तथा कृपा विधीयताम् ॥ ८ ॥

प्रमाणिकाष्टकद्वयं जपत्यधीत्य यः पुमान् ।
भवेत्स नन्दनन्दने भवे भवे सुभक्तिमान् ॥ ९ ॥



# ॥ कृष्णाष्टोत्तरशतनामस्तोत्रम् ॥

ॐ अस्य श्रीकृष्णाष्टोत्तरशतनामस्तोत्रस्य, श्रीशेष ऋषिः, अनुष्टुप्-छन्दः,
श्रीकृष्णो देवता, श्रीकृष्णप्रीत्यर्थे, श्री कृष्णाष्टोत्तरशतनामजपे विनियोगः।

॥ध्यानम्॥

शिखिमुकुटविशेषं नीलपद्माङ्गदेशं विधुमुखकृतकेशं कौस्तुभापीतवेशम्।
मधुररवकलेशं शं भजे भ्रातृशेषं व्रजजनवनितेशं माधवं राधिकेशम्॥

श्रीशेष उवाच:

वसुन्धरे वरारोहे जनानामस्ति मुक्तिदम्।
सर्वमङ्गलमूर्धन्यमणिमाद्यष्टसि द्धिदम्॥

महापातककोटिघ्नं सर्वतीर्थफलप्रदम्।
समस्तजपयज्ञानां फलदं पापनाशनम्॥

शृणु देवि प्रवक्ष्यामि नाम्नामष्टोत्तर शतम्।
सहस्रनाम्नां पुण्यानां त्रिरावृत्या तु यत्फलम्॥

एकावृत्या तु कृष्णस्य नामैकं तत्प्रयच्छति।
तस्मात्पुण्यतरं चैतत्स्तोत्रं पातकनाशनम्॥

नाम्नामष्टोत्तरशतस्याहमेव ऋषिः प्रिये।
छन्दोऽनुष्टुब्देवता तु योगः कृष्णप्रियावहः॥

॥स्तोत्रम्॥

श्रीकृष्णः कमलानाथो वासुदेवः सनातनः।
वसुदेवात्मजः पुण्यो लीलामानुषविग्रहः॥१॥

श्रीवत्सकौस्तुभधरो यशोदावत्सलो हरिः।
चतुर्भुजात्तचक्रासिगदाशङ्खाम्बजायुधः॥२॥

देवकीनन्दनः श्रीशोनन्दगोपप्रियात्मजः।
यमुनावेगसंहारी बलभद्रप्रियानुजः॥३॥

पूतनाजीवितहरः शकटासुरभञ्जनः।
नन्दव्रजजनानन्दी सच्चिदानन्दविग्रहः॥४॥

नवनीतविलिप्ताङ्गो नवनीतनटोऽनघः।
नवनीतनवाहारो मुचुकुन्दप्रसादकः॥५॥

षोडशस्त्रीसहस्रेशस्त्रिभङ्गी मधुराकृतिः।
शुकवागमृताब्धीन्दुर्गोविन्दो योगिनां पतिः॥६॥

वत्सवाटचरोऽनन्तो धेनुकासुरभञ्जनः।
तृणीकृततृणावर्तो यमलार्जुनभञ्जनः॥७॥

उत्तालतालभेत्ता च तमालश्यामलाकृतिः।
गोपगोपीश्वरो योगी कोटिसूर्यसमप्रभः॥८॥

इलापतिः परञ्ज्योतिर्यादवेन्द्रो यदूद्वहः।
वनमाली पीतवासाः पारिजातापहारकः॥९॥

गोवर्धनाचलोद्धर्ता गोपालः सर्वपालकः।
अजो निरञ्जनः कामजनकः कञ्जलोचनः॥१०॥

मधुहा मथुरानाथो द्वारकानायको बली।
वृन्दावनान्तसञ्चारी तुलसीदामभूषणः॥११॥

स्यमन्तकमणेर्हर्ता नरनारायणात्मकः।

कुब्जाकृष्णाम्बरधरो मायी परमपूरुषः॥१२॥

मुष्टिकासुरचाणूरमल्लयुद्धविशार दः।
संसारवैरी कंसारिर्मुरारिर्नरकान्तकः॥१३॥

अनादिब्रह्मचारी च कृष्णाव्यसनकर्षकः।
शिशुपालशिरश्छेत्ता दुर्योधनकुलान्तकः॥१४॥

विदुराक्रूरवरदो विश्वरूपप्रदर्शकः।
सत्यवाक् सत्यसङ्कल्पः सत्यभामारतो जयी॥१५॥

सुभद्रापूर्वजो विष्णुर्भीष्ममुक्तिप्रदायकः।
जगद्गुरुर्जगन्नाथो वेणुनादविशारदः॥१६॥

वृषभासुरविध्वंसी बाणासुरकरान्तकः।
युधिष्ठिरप्रतिष्ठाता बर्हिबर्हावतंसकः॥१७॥

पार्थसारथिरव्यक्तो गीतामृतमहोदधिः।
कालीयफणिमाणिक्यरञ्जितश्रीपदाम् बुजः॥१८॥

दामोदरो यज्ञभोक्ता दानवेन्द्रविनाशकः।
नारायणः परब्रह्म पन्नगाशनवाहनः॥१९॥

जलक्रीडासमासक्तगोपीवस्त्रापहार कः।
पुण्यश्लोकस्तीर्थपादो वेदवेद्यो दयानिधिः॥२०॥

सर्वतीर्थात्मकः सर्वग्रहरूपी परात्परः।
इत्येवं कृष्णदेवस्य नाम्नामष्टोत्तरं शतम्॥२१॥

कृष्णेन कृष्णभक्तेन श्रुत्वा गीतामृतं पुरा।
स्तोत्रं कृष्णप्रियकरं कृतं तस्मान्मया श्रुतम्॥२२॥

कृष्णप्रेमामृतं नाम परमानन्ददायकम्।
अत्युपद्रवदुःखघ्नं परमायुष्यवर्धनम्॥२३॥

दानं व्रतं तपस्तीर्थं यत्कृतं त्विह जन्मनि।
पठतां शृण्वतां चैव कोटिकोटिगुणं भवेत्॥२४॥

पुत्रप्रदमपुत्राणामगतीनां गतिप्रदम्।
धनावहं दरिद्राणां जयेच्छूनां जयावहम्॥२५॥

शिशूनां गोकुलानां च पुष्टिदं पुण्यवर्धनम्।
बालरोगग्रहादीनां शमनं शान्तिकारकम्॥२६॥

अन्ते कृष्णस्मरणदं भवतापत्रयापहम्।
असिद्धसाधकं भद्रे जपादिकरमात्मनाम्॥२७॥

कृष्णाय यादवेन्द्राय ज्ञानमुद्राय योगिने।
नाथाय रुक्मिणीशाय नमो वेदान्तवेदिने॥२८॥

इमं मन्त्रं महादेवि जपन्नेव दिवानिशम्।
सर्वग्रहानुग्रहभाक् सर्वप्रियतमो भवेत्॥२९॥

पुत्रपौत्रैः परिवृतः सर्वसिद्धिसमृद्धिमान्।
निषेव्यभोगानन्तेऽपि कृष्णसायुज्यमाप्नुयात्॥३०॥

**॥इति श्रीब्रह्माण्डे महापुराणे वायुप्रोक्ते मध्यभागे तृतीय उपोद्घातपादे भार्गवचरिते षट्त्रिंशत्तमोऽध्यायान्तर्गत श्रीकृष्णाष्टोत्तरशतनामस्तोत्र सम्पूर्णम्॥**

## ॥ बलिकृतं श्रीकृष्णस्तोत्रम् ॥

बलिरुवाच:

अदित्याः प्रार्थनेनैव मातृदेव्या व्रतेन च ।
पुरा वामनरुपेण त्वयाहं वञ्चितः प्रभो ॥ १ ॥

सम्पद्रूपा महालक्ष्मीर्दत्ता भक्ताय भक्तितः ।
शक्राय मत्तो भक्ताय भ्रात्रे पुण्यवते ध्रुवम् ॥ २ ॥

अधुना मम पुत्रोऽयं बाणः शंकरकिङ्करः ।
आराच्य रक्षितः सोऽपि तेनैव भक्तबन्धुना ॥ ३ ॥

परिपुष्टश्च्च पार्वत्या यथा मात्रा सुतस्तथा ।
गृहीतवांश्च्च तत्कन्या बलेन युवतीं सतीम् ॥ ४ ॥

समुद्यतश्च्च तं हन्तुं कार्तिकेनापि वारितः ।
आगतोऽसि पुनर्हन्तुं पौत्रस्य दमने क्षमम् ॥ ५ ॥

सर्वात्मनश्च्च सर्वत्र समभावः श्रुतौ श्रुतः ।
करोषि जगतां नाथ कथमेवं व्यतिक्रमम् ॥ ६ ॥

त्वया च निहतो यो हि तस्य को रक्षिता भुवि ।
सुदर्शनस्य तेजो हि सूर्यकोटिनिभं परम् ॥ ७ ॥

केषां सुराणामस्त्रेण तदेवमनिवारितम् ।
यथा सुदर्शनं चैवमस्त्राणां प्रवरं वरम् ॥ ८ ॥

तथा भवश्च्च देवानां सर्वेषामीश्वरः परः ।
यथा भवस्तथा कृष्णो विधाता वेधसामपि ॥ ९ ॥

विष्णुः सत्त्वगुणाधारः शिवः सत्त्वाश्रयस्तथा ।

स्वयं विधाता रजसः सृष्टिकर्ता पितामहः ॥ १० ॥

कालाग्निरुद्रो भगवान् विश्र्वसंहारकारकः ।
तमसश्र्चाश्रयः सोऽपि रुद्राणां प्रवरो महान् ॥ ११ ॥

स एव शंकरांशश्र्चाप्यन्ये रुद्राश्र्च तत्कलाः ।
भवांश्र्च निर्गुणस्तेषां प्रकृतेश्र्च परस्तथा ॥ १२ ॥

सर्वेषां परमात्मा वै प्राणा विष्णुस्वरुपिणः ।
मानसं च स्वयं ब्रह्मा स्वयं ज्ञानात्मकः शिवः ॥ १३ ॥

प्रवरा सर्वशक्तीनां बुद्धिः प्रकृतिरीश्र्वरी ।
स्वात्मनः प्रतिबिम्बस्ते जीवः सर्वेषु देहिषु ॥ १४ ॥

जीवः स्वकर्मणां भोगी स्वयं साक्षी भवांस्तथा ।
सर्वे यान्ति त्वयि गते नरदेवे यथानुगाः ॥ १५ ॥

सद्यः पतति देहश्र्च शवोऽस्पृश्यस्त्वया विना ।
बुद्धाः सन्तो न जानन्ति वञ्चितास्तव मायया ॥ १६ ॥

त्वां भजन्त्येव ये सन्तो मायामेतां तरन्ति ते ।
त्रिगुणा प्रकृतिर्दुर्गा वैष्णवी च सनातनी ॥ १७ ॥

परा नारायणीशानी तव माया दुरत्यया ।
त्वदंशाः प्रतिविश्र्वेषु ब्रह्मविष्णुशिवात्मकाः ॥ १८ ॥

सर्वेषामपि विश्र्वेषामाश्रयो यो महान् विराट् ।
स शेते च जले योगाद् विश्र्वेशो गोकुले यथा ॥ १९ ॥

स एव वासुर्भगवान् तस्य देवो भवान् परः ।
वासुदेव इति ख्यातः पुराविद्भिः प्रकीर्तितः ॥ २० ॥

त्वमेव कलया सूर्यस्त्वमेव कलया शशी ।
कलया च हुताशश्च कलया पवनः स्वयम् ॥ २१ ॥

कलया वरुणश्चैव कुबेरश्च यमस्तथा ।
कलया त्वं महेन्द्रश्च कलया धर्म एव च ॥ २२ ॥

त्वमेव कलया शेष ईशानो निर्ऋतिस्तथा ।
मुनयो मनवश्चैव ग्रहाश्च फलदायकाः ॥ २३ ॥

कलाकलायाश्चांशेन सर्वे जीवाश्चराचराः ।
त्वं ब्रह्म परमं ज्योतिर्ध्यायन्ते योगिनस्तथा ॥ २४ ॥

तत्त्वाद्रियन्ते भक्तास्ते ध्यायन्ते च तदन्तरे ।
नवीननीरदश्यामं पीतकौशेयवाससम् ॥ २५ ॥

ईषद्धास्यप्रसन्नास्यं भक्तेशं भक्तवत्सलम् ।
चन्दनोक्षितसर्वाङ्गं द्विभुजं मुरलीधरम् ॥ २६ ॥

मयूरपिच्छचूडं च मालतीमाल्यभूषितम् ।
अमूल्यरत्ननिर्माणकेयूरवलयान्वितम् ॥ २७ ॥

मणिकुण्डलयुग्मेन गण्डस्थलविराजितम् ।
रत्नसाराङ्गुलीयं च क्वणन्मञ्जीररञ्जितम् ॥ २८ ॥

कोटिकन्दर्पलीलाभं शरत्कमललोचनम् ।
शरत्पूर्णेन्दुनिन्द्यास्यं चन्द्रकोटिसमप्रभम् ॥ २९ ॥

वीक्षितं सस्मिताभिश्च गोपीनां कोटिकोटिभिः ।
वयस्यैः पार्षदैर्गोपैः सेवितं श्वेतचामरैः ॥ ३० ॥

गोपबालकवेषं च राधावक्षःस्थलस्थितम् ।
ध्यानासाध्यं दुराराध्यं ब्रह्मेशशेषवन्दितम् ॥ ३१ ॥

सिद्धेन्द्रैश्च मुनीन्द्रैश्च योगीन्द्रैः प्रणतं स्तुतम् ।
वेदानिर्वचनीयं च परं स्वेच्छामयं विभुम् ॥ ३२ ॥

स्थूलात् स्थूलतमं रुपं सूक्ष्मात् सूक्ष्मतमं परम् ।
सत्यं नित्यं प्रशस्तं च प्रकृतेः परमीश्वरम् ॥ ३३ ॥

निर्लिप्तं च निरीहं च भगवन्तं सनातनम् ।
एवं ध्यात्वा च ते पूताः स्निग्धदूर्वाक्षताञ्जलम् ॥ ३४ ॥

पद्मापद्मार्चिते पादपद्मे च दातुमुत्सुकाः ।
वेदाः स्तोतुमशक्तास्त्वामशक्ता सा सरस्वती ॥ ३५ ॥

शेषः स्तोतुमशक्तश्च स्वयम्भूः शम्भुरीश्वरम् ।
गणेशश्च दिनेशश्च महेन्द्रश्च एव च ॥ ३६ ॥

स्तोतुं नालं धनेशश्च किमन्ये जडबुद्धयः ।
गुणातीतमनीहं च किं स्तौमि निर्गुणं परम् ॥ ३७ ॥

अपण्डितोऽहमसुरो न सुरः क्षन्तुमर्हसि ॥ ३८ ॥

**॥ इति श्रीब्रह्मवैवर्ते बलिकृतं श्रीकृष्णस्तोत्रं संपूर्णम् ॥**

## ॥ कृष्णद्वादशनामस्तोत्रम् ॥

शृणुध्वं मुनयः सर्वे गोपालस्य महात्मनः।
अनन्तस्याप्रमेयस्य नामद्वाशकं स्तवम्॥

अर्जुनाय पुरा गीतं गोपालेन महात्मना।
द्वारकायां प्रार्थयते यशोदायाश्च सन्निधौ॥

॥ध्यानम्॥

जानुभ्यामपि धावन्तं बाहुभ्यामतिसुन्दरम्।
सकुण्डलाळकं बालं गोपालं चिन्तयेदुषः॥

॥स्तोत्रम्॥

प्रथमं तु हरिं विद्यात् द्वितीयं केशवं तथा।
तृतीयं पद्मनाभं तु चतुर्थं वामनं तथा॥१॥

पञ्चमं वेदगर्भं च षष्ठं तु मधुसूदनं।
सप्तमं वासुदेवं च वराहं चाष्टमं तथा॥२॥

नवमं पुण्डरीकाक्षं दशमं तु जनार्दनम्।
कृष्णमेकादशं प्रोक्तं द्वादशं श्रीधरं तथा॥३॥

एतद्द्वादशनामानि मया प्रोक्तानि फाल्गुन।
कालत्रये पठेद्यस्तु तस्य पुण्यफलं शृणु॥४॥

चान्द्रायणसहस्रस्य कन्यादानशतस्य च।
अश्वमेधसहस्रस्य फलमाप्नोति मानवः॥५॥

**॥इति श्रीकृष्णद्वादशनामस्तोत्रं सम्पूर्णम्॥**

## ॥ भीष्मकृता भगवत्स्तुतिः ॥

(श्रीमद्भागवतान्तर्गतम्)

भीष्म उवाचः

इति मतिरुपकल्पिता वितृष्णा भगवति सात्वतपुङ्गवे विभूम्नि ।
स्वसुखमुपगते क्वचिद्विहर्तुं प्रकृतिमुपेयुषि यद्भवप्रवाहः ॥ १ ॥

त्रिभुवनकमनं तमालवर्णं रविकरगौरवराम्बरं दधाने ।
वपुरलककुलावृताननाब्जं विजयसखे रतिरस्तुमेऽनवद्या ॥ २ ॥

युधि तुरगरजोविधूम्रविष्वक्कचलुलितश्रमवार्यलङ्कृतास्ये ।
मम निशितशरैर्विभिध्यमानत्वचि विलसत्कवचेऽस्तु कृष्ण आत्मा ॥ ३ ॥

सपदि सखि वचो निशम्य मध्ये निजपरयोर्बलयो रथं निवेश्य ।
स्थितवति परसैनिकायुरक्ष्णा हृतवति पार्थसखे रतिर्ममास्तु ॥ ४ ॥

व्यवहितपृतनामुखं निरीक्ष्य स्वजनवधाद्विमुखस्य दोषबुद्ध्या ।
कुमतिमहरदात्मविद्यया यः चरणरतिः परमस्य तस्य मेऽस्तु ॥ ५ ॥

स्वनिगममपहाय मत्प्रतिज्ञामृतमधिकर्तुमवप्लुतो रथस्थः ।
धृतरथचरणोऽभ्ययाच्चलद्गुर्हरिरिव हन्तुमिभं गतोत्तरीयः ॥ ६ ॥

शितविशिखहतो विशीर्णदंशः क्षतजपरिप्लुत आततायिनो मे ।
प्रसभमभिससार मद्वधार्थंस भवतु मे भगवान् गतिर्मुकुन्दः ॥ ७ ॥

विजयरथकुटुम्ब आत्ततोत्रे धृतहयरश्मिनि तच्छ्रियेक्षणीये।
भगवति रतिरस्तु मे मुमूर्षोः यमिह निरीक्ष्य हताः गताः सरूपम् ॥८॥

ललितगतिविलासवल्गुहासप्रणयनिरीक्षणकल्पितोरुमानाः ।
कृतमनुकृतवत्य उन्मदान्धाः प्रकृतिमगन्किल यस्य गोपवध्वः ॥९ ॥

मुनिगणनृपवर्यसङ्कुलेऽन्तः सदसि युधिष्ठिरराजसूय एषाम् ।
अर्हणमुपपेद ईक्षणीयो मम दृशिगोचर एष आविरात्मा ॥ १० ॥

तमिममहमजं शरीरभाजां हृदि हृदि धिष्ठितमात्मकल्पितानाम् ।
प्रतिदृशमिव नैकधार्कमेकं समधिगतोऽस्मि विधूत भेदमोहः ॥ ११ ॥

## ॥ गोविन्ददामोदरस्तोत्रम् ॥

अग्रे कुरूणामथ पाण्डवानां दुःशासनेनाहृतवस्त्रकेशा ।
कृष्णा तदाक्रोशदनन्यनाथा गोविन्द दामोदर माधवेति ॥ १ ॥

श्री कृष्ण विष्णो मधुकैटभारे भक्तानुकम्पिन् भगवन् मुरारे ।
त्रायस्व मां केशव लोकनाथ गोविन्द दामोदर माधवेति ॥ २ ॥

विक्रेतुकामाखिलगोपकन्या मुरारिपादार्पितचित्तवृत्तिः ।
दध्यादिकं मोहवशादवोचद् गोविन्द दामोदर माधवेति ॥ ३ ॥

उलूखले संभृततण्डुलांश्च संघट्टयन्त्यो मुसलैः प्रमुग्धाः ।
गायन्ति गोप्यो जनितानुरागा गोविन्द दामोदर माधवेति ॥ ४ ॥

काचित्करांभोजपुटे निषण्णं क्रीडाशुकं किंशुकरक्ततुण्डं ।
अध्यापयामास सरोरुहाक्षी गोविन्द दामोदर माधवेति ॥ ५ ॥

गृहे गृहे गोपवधू समूहः प्रतिक्षणं पिन्ञ्जरसारिकाणां ।
स्खलद्गिरं वाचयितुं प्रवृत्तो गोविन्द दामोदर माधवेति ॥ ६ ॥

पर्यङ्किकाभाजमलं कुमारं प्रस्वापयन्त्योऽखिलगोपकन्याः ।
जगुः प्रबन्धं स्वरतालबन्धं गोविन्द दामोदर माधवेति ॥ ७ ॥

रामानुजं वीक्षणकेलिलोलं गोपी गृहीत्वा नवनीतगोलं ।
आबालकं बालकमाजुहाव गोविन्द दामोदर माधवेति ॥ ८ ॥

विचित्रवर्णाभरणाभिरामेऽभिधेहि वक्त्रांबुजराजहंसि ।
सदा मदीये रसनेऽग्ररङ्गे गोविन्द दामोदर माधवेति ॥ ९ ॥

अङ्काधिरूढं शिशुगोपगूढं स्तनंधयन्तं कमलैककान्तं ।
संबोधयामास मुदा यशोदा गोविन्द दामोदर माधवेति ॥ १० ॥

क्रीडन्तमन्तर्व्रजमात्मजं स्वं समं वयस्यैः पशुपालबालैः ।
प्रेम्णा यशोदा प्रजुहाव कृष्णं गोविन्द दामोदर माधवेति ॥ ११ ॥

यशोदया गाढमुलूखलेन गोकण्ठपाशेन निबध्यमानः ।
रुरोद मन्दं नवनीतभोजी गोविन्द दामोदर माधवेति ॥ १२ ॥

निजाङ्गणे कङ्कणकेलिलोलं गोपी गृहीत्वा नवनीतगोलं ।
आमर्दयत्पाणितलेन नेत्रे गोविन्द दामोदर माधवेति ॥ १३ ॥

गृहे गृहे गोपवधूकदम्बाः सर्वे मिलित्वा समवाययोगे ।
पुण्यानि नामानि पठन्ति नित्यं गोविन्द दामोदर माधवेति ॥ १४ ॥

मन्दारमूले वदनाभिरामं बिम्बाधरापूरित वेणुनादं ।
गोगोपगोपीजनमध्यसंस्थं गोविन्द दामोदर माधवेति ॥ १५ ॥

उत्थाय गोप्योऽपररात्रभागे स्मृत्वा यशोदासुतबालकेलिं ।
गायन्ति प्रोच्चैर्दधि मन्थयन्त्यो गोविन्द दामोदर माधवेति ॥ १६ ॥

जग्धोऽथ दत्तो नवनीतपिण्डो गृहे यशोदा विचिक्त्सयन्ती ।
उवाच सत्यं वद हे मुरारे गोविन्द दामोदर माधवेति ॥ १७ ॥

अभ्यर्च्य गेहं युवतिः प्रवृद्धप्रेमप्रवाहा दधि निर्ममन्थ ।
गायन्ति गोप्योऽथ सखीसमेता गोविन्द दामोदर माधवेति ॥ १८ ॥

क्वचित् प्रभाते दधिपूर्णपात्रे निक्षिप्य मन्थं युवती मुकुन्दं ।
आलोक्य गानं विविधं करोति गोविन्द दामोदर माधवेति ॥ १९ ॥

क्रीडापरं भोजनमज्जनार्थं हितैषिणी स्त्री तनुजं यशोदा ।
आजूहवत् प्रेमपरिप्लुताक्षी गोविन्द दामोदर माधवेति ॥ २० ॥

सुखं शयानं निलये च विष्णुं देवर्षिमुख्या मुनयः प्रपन्नाः ।

तेनाच्युते तन्मयतां व्रजन्ति गोविन्द दामोदर माधवेति ॥ २१ ॥

विहाय निद्रामरुणोदये च विधाय कृत्यानि च विप्रमुख्याः ।
वेदावसाने प्रपठन्ति नित्यं गोविन्द दामोदर माधवेति ॥ २२ ॥

वृन्दावने गोपगणाश्च गोप्यो विलोक्य गोविन्द वियोगखिन्नाम् ।
राधां जगुः साश्रुविलोचनाभ्यां गोविन्द दामोदर माधवेति ॥ २३ ॥

प्रभातसञ्चारगता नु गावस्तद्रक्षणार्थं तनयं यशोदा ।
प्राबोधयत् पाणितलेन मन्दं गोविन्द दामोदर माधवेति ॥ २४ ॥

प्रवालशोभा इव दीर्घकेशा वाताम्बुपर्णाशनपूतदेहाः ।
मूले तरूणां मुनयः पठन्ति गोविन्द दामोदर माधवेति ॥ २५ ॥

एवं ब्रुवाणा विरहातुरा भृशं व्रजस्त्रियः कृष्णविषक्तमानसाः ।
विसृज्य लज्जां रुरुदुः स्म सुस्वरं गोविन्द दामोदर माधवेति ॥ २६ ॥

गोपी कदाचिन्मणिपिञ्जरस्थं शुकं वचो वाचयितुं प्रवृत्ता ।
आनन्दकन्द व्रजचन्द्रकृष्ण गोविन्द दामोदर माधवेति ॥ २७ ॥

गोवत्सबालैः शिशुकाकपक्षं बध्नन्तमम्भोजदलायताक्षम् ।
उवाच माता चिबुकं गृहीत्वा गोविन्द दामोदर माधवेति ॥ २८ ॥

प्रभातकाले वरवल्लवौघा गोरक्षणार्थं धृतवेत्रदण्डाः ।
आकारयामासुरनन्तमाद्यं गोविन्द दामोदर माधवेति ॥ २९ ॥

जलाशये कालियमर्दनाय यदा कदम्बादपतन्मुरारिः ।
गोपाङ्गनाश्चुक्रुशुरेत्य गोपा गोविन्द दामोदर माधवेति ॥ ३० ॥

अक्रूरमासाद्य यदा मुकुन्दश्चापोत्सवार्थं मथुरां प्रविष्टः ।
तदा स पौरैर्जयतीत्यभाषि गोविन्द दामोदर माधवेति ॥ ३१ ॥

कंसस्य दूतेन यदैव नीतौ वृन्दावनान्ताद् वसुदेवसूनू ।
रुरोद गोपी भवनस्य मध्ये गोविन्द दामोदर माधवेति ॥ ३२ ॥

सरोवरे कालियनागबद्धं शिशुं यशोदातनयं निशम्य ।
चक्रुर्लुठन्त्यः पथि गोपबाला गोविन्द दामोदर माधवेति ॥ ३३ ॥

अक्रूरयाने यदुवंशनाथं संगच्छमानं मथुरां निरीक्ष्य ।
ऊचुर्वियोगात् किल गोपबाला गोविन्द दामोदर माधवेति ॥ ३४ ॥

चक्रन्द गोपी नलिनीवनान्ते कृष्णेन हीना कुसुमे शयाना ।
प्रफुल्लनीलोत्पललोचनाभ्यां गोविन्द दामोदर माधवेति ॥ ३५ ॥

मातापितृभ्यां परिवार्यमाणा गेहं प्रविष्टा विललाप गोपी ।
आगत्य मां पालय विश्वनाथ गोविन्द दामोदर माधवेति ॥ ३६ ॥

वृन्दावनस्थं हरिमाशु बुद्ध्वा गोपी गता कापि वनं निशायाम् ।
तत्राप्यदृष्ट्वातिभयादवोचद् गोविन्द दामोदर माधवेति ॥ ३७ ॥

सुखं शयाना निलये निजेऽपि नामानि विष्णोः प्रवदन्ति मर्त्याः ।
ते निश्चितं तन्मयतां व्रजन्ति गोविन्द दामोदर माधवेति ॥ ३८ ॥

सा नीरजाक्षीमवलोक्य राधां रुरोद गोविन्दवियोगखिन्नाम् ।
सखी प्रफुल्लोत्पललोचनाभ्यां गोविन्द दामोदर माधवेति ॥ ३९ ॥

जिह्वे रसज्ञे मधुरप्रिया त्वं सत्यं हितं त्वां परमं वदामि ।
आवर्णयेथा मधुराक्षराणि गोविन्द दामोदर माधवेति ॥ ४० ॥

आत्यन्तिकव्याधिहरं जनानां चिकित्सकं वेदविदो वदन्ति ।
संसारतापत्रयनाशबीजं गोविन्द दामोदर माधवेति ॥ ४१ ॥

ताताज्ञया गच्छति रामचन्द्रे सलक्ष्मणेऽरण्यचये ससीते ।
चक्रन्द रामस्य निजा जनित्री गोविन्द दामोदर माधवेति ॥ ४२ ॥

एकाकिनी दण्डककाननान्तात् सा नीयमाना दशकन्धरेण ।
सीता तदाक्रन्ददनन्यनाथा गोविन्द दामोदर माधवेति ॥ ४३ ॥

रामाद्वियुक्ता जनकात्मजा सा विचिन्तयन्ती हृदि रामरूपम् ।
रुरोद सीता रघुनाथ पाहि गोविन्द दामोदर माधवेति ॥ ४४ ॥

प्रसीद विष्णो रघुवंशनाथ सुरासुराणां सुखदुःखहेतो ।
रुरोद सीता तु समुद्रमध्ये गोविन्द दामोदर माधवेति ॥ ४५ ॥

अन्तर्जले ग्राहगृहीतपादो विसृष्टविक्लिष्ट समस्तबन्धुः ।
तदा गजेन्द्रो नितरां जगाद गोविन्द दामोदर माधवेति ॥ ४६ ॥

हंसध्वजः शङ्खयुतो ददर्श पुत्रं कटाहे प्रपन्तमेनं ।
पुण्यानि नामानि हरेर्जपन्तं गोविन्द दामोदर माधवेति ॥ ४७ ॥

दुर्वाससो वाक्यमुपेत्य कृष्णा साचाब्रवीत् काननवासिनीशम् ।
अन्तःप्रविष्टं मनसाजुहाव गोविन्द दामोदर माधवेति ॥ ४८ ॥

ध्येयः सदा योगिभिरप्रमेयश्चिन्ताहरश्चिन् तितपारिजातः ।
कस्तूरिकाकल्पितनीलवर्णो गोविन्द दामोदर माधवेति ॥ ४९ ॥

संसारकूपे पतितोऽत्यगाधे मोहान्धपूर्णे विषयाभितप्ते ।
करावलंबं मम देहि विष्णो गोविन्द दामोदर माधवेति ॥ ५० ॥

त्वामेव याचे मम देहि जिह्वे समागते दण्डधरे कृतान्ते ।
वक्तव्यमेवं मधुरं सुभक्त्या गोविन्द दामोदर माधवेति ॥ ५१ ॥

भजस्व मन्त्रं भवबन्धमुक्त्यै जिह्वे रसज्ञे सुलभं मनोज्ञं ।
द्वैपायनाद्यैर्मुनिभिः प्रजप्तं गोविन्द दामोदर माधवेति ॥ ५२ ॥

गोपाल वंशीधर रूपसिन्धो लोकेश नारायण दीनबन्धो ।

उच्चस्वरैस्त्वं वद सर्वदैव गोविन्द दामोदर माधवेति ॥ ५३ ॥

जिह्वे सदैवं भज सुन्दराणि नामानि कृष्णस्य मनोहराणि ।
समस्तभक्तार्तिविनाशनानि गोविन्द दामोदर माधवेति ॥ ५४ ॥

गोविन्द गोविन्द हरे मुरारे गोविन्द गोविन्द मुकुन्द कृष्ण ।
गोविन्द गोविन्द रथाङ्गपाणे गोविन्द दामोदर माधवेति ॥ ५५ ॥

सुखावसाने त्विदमेव सारं दुःखावसाने त्विदमेव गेयं ।
देहावसाने त्विदमेव जाप्यं गोविन्द दामोदर माधवेति ॥ ५६ ॥

दुर्वारिवाक्यं परिगृह्य कृष्णा मृगीव भीता तु कथं कथञ्चित् ।
सभां प्रविष्टा मनसाजुहाव गोविन्द दामोदर माधवेति ॥ ५७ ॥

श्रीकृष्ण राधावर गोकुलेश गोपाल गोवर्धन नाथ विष्णो ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ५८ ॥

श्रीनाथ विश्वेश्वर विश्वमूर्ते श्री देवकीनन्दन दैत्यशत्रो ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ५९ ॥

गोपीपते कंसरिपो मुकुन्द लक्ष्मीपते केशव वासुदेव ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ६० ॥

गोपीजनाह्लादकर व्रजेश गोचारणारण्यकृतप्रवेश ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ६१ ॥

प्राणेश विश्वंभर कैटभारे वैकुण्ठ नरायण चक्रपाणे ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ६२ ॥

हरे मुरारे मधुसूदनाद्य श्रीराम सीतावर रावणारे ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ६३ ॥

श्री यादवेन्द्राद्रिधराम्बुजाक्ष गोगोपगोपीसुखदानदक्ष ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ६४ ॥

धराभरोत्तारणगोपवेष विहारलीलाकृतबन्धुशेष ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ६५ ॥

बकीबकाघासुरधेनुकारे केशीतृणावर्तविघातदक्ष ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ६६ ॥

श्रीजानकीजीवन रामचन्द्र निशाचरारे भरताग्रजेश ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ६७ ॥

नारायणानन्त हरे नृसिंह प्रह्लादबाधाहर हे कृपालो ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ६८ ॥

लीलामनुष्याकृतिरामरूप प्रतापदासीकृतसर्वभूप ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ६९ ॥

श्रीकृष्ण गोविन्द हरे मुरारे हे नाथ नारायण वासुदेव ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ७० ॥

वक्तुं समर्थोऽपि न वक्ति कश्चिदहो जनानां व्यसनाभिमुख्यम् ।
जिह्वे पिबस्वामृतमेतदेव गोविन्द दामोदर माधवेति ॥ ७१ ॥

## ॥ कुन्तीदेवीकृत श्रीकृष्णस्तोत्रम् ॥

नमस्ये पुरुषं त्वाद्यमीश्वरं प्रकृतेः परम्।
अलक्ष्यं सर्वभूतानामन्तर्बहिरवस्थितम्॥१॥

माया जवनिकाच्छन्नमज्ञाऽधोक्षजमव्ययम्।
न लक्ष्यसे मूढदृशा नटो नाट्यधरो यथा ॥२॥

तथा परमहंसानां मुनीनाममलात्मनाम्।
भक्तियोगविधानार्थं कथं पश्येमहि स्त्रियः ॥३॥

कृष्णाय वासुदेवाय देवकीनन्दनाय च।
नन्दगोपकुमाराय गोविन्दाय नमो नमः ॥४॥

नमः पङ्कजनाभाय नमः पङ्कजमालिने।
नमः पङ्कजनेत्राय नमस्ते पङ्कजाङ्घ्रये॥५॥

विपदः सन्तु नः शश्वत् तत्र तत्र जगद्गुरो।
भवतो दर्शनं यत्स्यादपुनर्भवदर्शनम्॥६॥

जन्मैश्वर्यश्रुतश्रीभिरेधमानमदः पुमान्।
नैवार्हत्यभिधातुं वै त्वामकिञ्चनगोचरम्॥७॥

नमोऽकिञ्चनवित्ताय निवृत्तगुणवृत्तये।
आत्मारामाय शान्ताय कैवल्यपतये नमः ॥८॥

शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः स्मरन्ति नन्दन्ति तवेहितं जनाः।
त एव पश्यन्त्यचिरेण तावकं भवप्रवाहोपरमं पदाम्बुजम् ॥९॥

त्वयि मेऽनन्यविषया मतिर्मधुपतेऽसकृत्
रतिमुद्वहतादद्धा गङ्गेवौघमुदन्वति॥१०॥

श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य।
गोविन्द गोद्विजसुरार्तिहरावतार योगेश्वराखिलगुरो भगवन्नमस्ते ॥११॥

## ॥ वसुदेवकृत श्रीकृष्णस्तोत्रम् ॥

त्वामतीन्द्रियमव्यक्तमक्षरं निर्गुणं विभुं
ध्यानासाध्यञ्च सर्वेषां परमात्मानमीश्वरम्॥१॥

स्वेच्छामयं सर्वरूपं स्वेच्छारूपधरं परं।
निर्लिप्तं परमं ब्रह्म बीजरूपं सनातनम् ॥२॥

स्थूलात् स्थूलतरं प्राप्तमतिसूक्ष्ममदर्शनं।
स्थितं सर्वशरीरेषु साक्षिरूपमदृश्यकम्॥३॥

शरीरवन्तं सगुणमशरीरं गुणोत्करं।
प्रकृतिं प्रकृतीशञ्च प्राकृतं प्रकृतेः परम् ॥४॥

सर्वेशं सर्वरूपञ्च सर्वान्तकरमव्ययं
सर्वाधारं निराधारं निर्व्यूहं स्तौमि तं विभुम् ॥५॥

अनन्तः स्तवनेऽशक्तोऽशक्ता देवी सरस्वती।
यं वा स्तोतुमशक्तश्च पञ्चवक्त्रः षडाननः॥६॥

चतुर्मुखो वेदकर्ता यं स्तोतुमक्षमस्तथा
गणेशो न समर्थश्च योगीन्द्राणां गुरोर्गुरुः ॥७॥

ऋषयो देवताश्चैव मुनीन्द्रमनुमानवाः।
स्वप्ने तेषामदृश्यश्च त्वमेकं किं स्तुवन्ति ते॥८॥

श्रुतयः स्तवनेऽशक्ताः किं स्तुवन्ति विपश्चितः।

विहायेमं शरीरञ्च बालो भवितुमर्हसि ॥९॥

वसुदेवकृतं स्तोत्रं त्रिसन्ध्यं यः पठेन्नरः।
भक्तिं दास्यमवाप्नोति श्रीकृष्णचरणांबुजे ॥१०॥

विशिष्टपुत्रं लभते हरिदासं गुणान्वितं।
संकटं निस्तरेत्तूर्णं शत्रुभीतेः प्रमुच्यते ॥११॥





**संकलनकर्ता:**

**श्री मनीष त्यागी**

संस्थापक एवं अध्यक्ष
श्री हिंदू धर्म वैदिक एजुकेशन फाउंडेशन

www.shdvef.com

**।।ॐ नमो भगवते वासुदेवाय:।।**